प्रथमः पाठः

# विद्ययाऽमृतमश्नुते

प्रस्तुत पाठ ईशावास्योपनिषत् से संकलित है। 'ईशावास्यम्' पद से आरम्भ होने के कारण इसे ईशावास्योपनिषत् की संज्ञा दी गयी है। यह उपनिषत् यजुर्वेद की माध्यन्दिन एवं काण्व संहिता का 40वाँ अध्याय है, जिसमें 18 मन्त्र हैं।

इस संकलन के आद्य दो मन्त्रों में ईश्वर की सर्वत्र विद्यमानता को दर्शाते हुए, कर्तव्य भावना से कर्म करने एवं त्यागपूर्वक संसार के पदार्थों का उपयोग एवं संरक्षण करने का निर्देश है। आत्मस्वरूप ईश्वर की व्यापकता को जो लोग स्वीकार नहीं करते हैं, उनके अज्ञान को तृतीय मन्त्र में दर्शाया है। चतुर्थ मन्त्र में चैतन्य स्वरूप, स्वयं प्रकाश एवं विभु सर्वव्यापक आत्म तत्त्व का निरूपण है। पञ्चम एवं षष्ठ मन्त्रों में अविद्या अर्थात् व्यावहारिक ज्ञान एवं विद्या अर्थात् आध्यात्मिक ज्ञान पर सूक्ष्म चिन्तन निहित है। अन्तिम मन्त्र व्यावहारिक ज्ञान से लौकिक अभ्युदय एवं अध्यात्मज्ञान से अमरता की प्राप्ति को बतलाता है।

इस पाठ्यांश से यह सन्देश मिलता है कि लौकिक एवं अध्यात्म विद्या एक दूसरे की पूरक है तथा मानव जीवन की परिपूर्णता एवं सर्वाङ्गीण विकास में समान रूप से महत्त्व रखती हैं।

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥1॥**

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥2॥**

**असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।**
**ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥3॥**

www.dreamtopper.in

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥4॥

अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रताः ॥5॥

अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥6॥

विद्यां चाविद्यां च यस्तद्वेदोभयं स ह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥7॥

www.dreamtopper.in

## शब्दार्थाः टिप्पण्यश्च

**ईशावास्यम्** – ईशस्य ईशेन वा आवास्याम्। ईश के रहने योग्य अर्थात् ईश्वर से व्याप्त।

**जगत्** – गच्छति इति जगत्। सततं परिवर्तमानः प्रपञ्चः। सतत परिवर्तनशील संसार।

**भुञ्जीथाः** – भोगं कुरु। भोग करो। विषय वस्तु का ग्रहण करो। भुज् (पालने अभ्यवहारे च) धातु, आत्मनेपदी, विधिलिङ्, मध्यम पुरुष, एकवचन।

**मा गृधः** – लोलुपः मा भव। लोलुप मत हो। लोभ मत करो। गृध् (अभिकांक्षायाम्) धातु। लङ् लकार, मध्यम पुरुषः एकवचन में 'अगृधः' रूप बनता है। व्याकरण नियमानुसार निषेधार्थक अव्यय 'माङ्' के योग में 'अगृधः' के आरम्भ में विद्यमान 'अ' कार का लोप होता है।

**कस्यस्विद्** – किसी का। इस के समानार्थक पद हैं–कस्यचित्, कस्यचन। अव्यय।

**कुर्वन्नेव** – करते हुए ही। कृ + शतृ पुंलिङ्ग, प्रथमा विभक्ति, एकवचन कुर्वन् + एव।

**जिजीविषेत्** – जीवितुम् इच्छेत्। जीने की इच्छा करें। जीव (प्राणधारणे) धातु, इच्छार्थक सन् प्रत्यय से विधि लिङ्। जीव + सन् + विधिलिङ्।

| | | |
|---|---|---|
| **कर्म न लिप्यते** | – | कर्म लिप्त नहीं होता। लिप (उपदेहे) धातु, लट्, कर्मणि प्रयोग। 'कर्म नरे न लिप्यते–यह एक विशिष्ट वैदिक प्रयोग है। तुलना कीजिये–'लिप्यते न स पापेन।' (भगवद्गीता–5.10) |
| **असुर्याः** | – | प्रकाशहीन। अथवा असुर सम्बन्धी। अविद्यादि दोषों से युक्त, प्राणपोषण में निरत। असुर + य; असु + रा + य। बहुवचन। |
| **अन्धेन तमसा** | – | अत्यन्त अज्ञान रूपी अन्धकार से। 'तमः' शब्द अज्ञान का बोधक। |
| **आवृताः** | – | आच्छादित। आ + वृ (वरणे) + क्त। |
| **प्रेत्य** | – | मरणं प्राप्य, मरण प्राप्तकर। इण् (गतौ) धातु। प्र + इ + ल्यप्। |
| **आत्महनः** | – | आत्मानं ये घ्नन्ति। आत्मा की व्यापकता को जो स्वीकार नहीं करते। 'आत्मानं = ईशं सर्वतः पूर्णं चिदानन्दं घ्नन्ति = तिरस्कुर्वन्ति (शाङ्करभाष्ये)'। |
| **अनेजत्** | – | कम्पन रहित। विकार रहित, स्थिर, अचल। एजृ (कम्पने) धातु। न + एज् + शतृ। नपुंसक लिङ्ग, प्रथमा विभक्ति एकवचन। |
| **जवीयः** | – | अतिशयेन जववत्। अधिक वेगवाला। जव + मतुप् + ईयस्। नपुंसक लिङ्ग, प्रथमा विभक्ति एकवचन। |
| **न आप्नुवन्** | – | प्राप्त नहीं किया। आप्लृ (व्याप्तौ), लङ् लकार प्रथम पुरुष बहुवचन। |
| **अर्षत्** | – | गच्छत्। गमनशील। ऋषी (गतौ) धातु। शतृ प्रत्यय, नपुंसक लिङ्ग, प्रथमा विभक्ति एकवचन। अथवा ऋ (गतौ) धातु, लेट् लकार। |
| **तिष्ठत्** | – | स्थिर रहने वाला। परिवर्तन रहित। स्था + शतृ, नपुंसक लिङ्ग, प्रथमा विभक्ति एकवचन। |
| **मातरिश्वा** | – | वायु। प्राणवायु। मातरि = अन्तरिक्षे श्वयति = गच्छति इति मातरिश्वा। नकारान्त पुंलिङ्ग, प्रथमा विभक्ति एकवचन। |
| **प्रविशन्ति** | – | प्रवेश करते हैं। प्र + विश् (प्रवेशने) लट् लकार प्रथम पुरुष बहुवचन। |
| **उपासते** | – | उपासना करते हैं। उप + आसते। आस् (उपवेशने) धातु लट् लकार प्रथम पुरुष बहुवचन। आस्ते आसाते आसते। |
| **ततोभूय इव** | – | उससे अधिक। तीनों पद अव्यय हैं। |
| **रताः** | – | रमण करते हैं। निरत हैं। रम् (क्रीडायां) + क्त। प्रथमा विभक्ति बहुवचन। |
| **वेद** | – | जानता है। विद् (ज्ञाने) धातु, लट् लकार प्रथम पुरुष एकवचन। |
| **उभयम्** | – | दोनों। |

www.dreamtopper.in

| | | |
|---|---|---|
| **तीर्त्वा** | – | तरणकर। तॄ (प्लवनतरणयोः) + क्त्वा। अव्यय। |
| **अमृतम्** | – | अमरता को। जन्म-मृत्यु के दुःख से रहित अमरत्व को। |
| **अश्नुते** | – | प्राप्त करता है। अश् (भोजने) धातु। भोजनार्थक धातु इस सन्दर्भ में प्राप्ति के अर्थ में है। (अश्नुते प्राप्तिकर्मा; निघण्टुः 2.18) |
| **आहुः** | – | कहते हैं। ब्रूञ् (व्यक्तायां वाचि) लट् लकार प्रथम पुरुष बहुवचन। |
| **शुश्रुम** | – | सुन चुके हैं। श्रु (श्रवणे) धातु, लिट् लकार उत्तम पुरुष बहुवचन। |
| **विचचक्षिरे** | – | स्पष्ट उपदेश दिये थे। वि + चक्षिङ् (आख्याने) धातु, लिट् लकार प्रथम पुरुष बहुवचन। चचक्षे चचक्षाते चचक्षिरे। |
| **विद्या** | – | ज्ञान, अध्यात्म ज्ञान। विद् (ज्ञाने) + क्यप् + टाप्। यहाँ 'अध्यात्म विद्या' के अर्थ में 'विद्या' शब्द का प्रयोग हुआ है। इस चराचर जगत् में सर्वत्र व्याप्त आत्मस्वरूप ईश्वर के ज्ञान को 'अध्यात्मविद्या' की संज्ञा दी गयी है। यह यथार्थ ज्ञान 'विद्या' है। मोक्ष विद्या नाम से भी जाना जाता है। |
| **अविद्या** | – | अध्यात्मेतर विद्या, व्यावहारिक विद्या। अध्यात्म ज्ञान से भिन्न सभी ज्ञान। न + विद्या। 'न' का अर्थ है 'इतर' अथवा 'भिन्न'। अर्थात् 'आत्मविद्या से भिन्न' जो भी ज्ञानराशि है जैसे सृष्टिविज्ञान, यज्ञविद्या, भौतिक विज्ञान, आयुर्विज्ञान, प्रौद्योगिकी, सूचना-तन्त्र-ज्ञान आदि अविद्या पद में समाहित हैं। |

www.dreamtopper.in

## अभ्यासः

1. **संस्कृतभाषया उत्तरं लिखत ।**

(क) ईशावास्योपनिषद् कस्याः संहितायाः भागः?

(ख) जगत्सर्वं कीदृशम् अस्ति?

(ग) पदार्थभोगः कथं करणीयः?

(घ) शतं समाः कथं जिजीविषेत्?

(ङ) आत्महनो जनाः कीदृशं लोकं गच्छन्ति?

(च) मनसोऽपि वेगवान् कः?

(छ) तिष्ठन्नपि कः धावतः अन्यान् अत्येति?

(ज) अन्धन्तमः के प्रविशन्ति?

(झ) धीरेभ्यः ऋषयः किं श्रुतवन्तः?

(ञ) अविद्यया किं तरति?

(ट) विद्यया किं प्राप्नोति?

2. **'ईशावास्यम्......कस्यस्विद्धनम्' इत्यस्य भावं सरलसंस्कृतभाषया विशदयत ।**

3. **'अन्धन्तमः प्रविशन्ति......विद्यायां रताः' इति मन्त्रस्य भावं हिन्दीभाषया आंग्लभाषया वा विशदयत ।**

4. **'विद्यां चाविद्यां च......ऽमृतमश्नुते' इति मन्त्रस्य तात्पर्यं स्पष्टयत ।**

5. **रिक्तस्थानानि पूरयत ।**

(क) इदं सर्वं जगत् .........................।

(ख) मा गृधः ......................... ।

(ग) शतं समाः ......................... जिजीविषेत्।

(घ) असुर्या नाम लोका ......................... आवृताः।

(ङ) अविद्योपासकाः ......................... प्रविशन्ति।

6. **अधोलिखितानां सप्रसङ्गं हिन्दीभाषया व्याख्या कार्या ।**

(क) तेन त्यक्तेन भुञ्जीथाः।

(ख) न कर्म लिप्यते नरे।

(ग) तस्मिन्नपो मातरिश्वा दधाति।

(घ) अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।

(ङ) एवं त्वयि नान्यथेतोऽस्ति।

(च) तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।

(छ) अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्।



www.dreamtopper.in

**7. उपनिषन्मन्त्रयोः अन्वयं लिखत ।**

अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ।।
अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ।।

**8. प्रकृतिं प्रत्ययं च योजयित्वा पदरचनां कुरुत ।**

त्यज् + क्त; कृ + शतृ; तत् + तसिल्

**9. प्रकृतिप्रत्ययविभागः क्रियताम् ।**

प्रेत्य, तीर्त्वा, धावतः, तिष्ठत्, जवीयः

**10. अधोलिखितानि पदानि आश्रित्य वाक्यरचनां कुरुत ।**

जगत्यां, धनम्, भुञ्जीथाः, शतम्, कर्माणि, तमसा, त्वयि, अभिगच्छन्ति, प्रविशन्ति, धीराणां, विद्यायाम्, भूयः, समाः।

**11. सन्धिं सन्धिविच्छेदं वा कुरुत ।**

(क) ईशावास्यम् ..................... + .....................

(ख) कुर्वन्नेवेह ..................... + ..................... + ................

(ग) जिजीविषेत् + शतं .....................

(घ) तत् + धावतः .....................

(ङ) अनेजत् + एकं .....................

(च) आहुः + अविद्यया .....................

(छ) अन्यथेतः ..................... + .....................

(ज) तांस्ते ..................... + .....................



www.dreamtopper.in

**12. अधोलिखितानां समुचितं योजनं कुरुत ।**

| | | |
|---|---|---|
| धनम् | — | वायुः |
| समाः | — | आत्मानं ये घ्नन्ति |
| असुर्याः | — | श्रुतवन्तः स्म |
| आत्महनः | — | तमसाऽऽवृताः |
| मातरिश्वा | — | वर्षाणि |
| शुश्रुम | — | अमरतां |
| अमृतम् | — | वित्तम् |

**13. अधोलिखितानां पदानां पर्यायपदानि लिखत ।**

नरे, ईशः, जगत्, कर्म, धीराः, विद्या, अविद्या

**14. अधोलिखितानां पदानां विलोमपदानि लिखत ।**

एकम्, तिष्ठत्, तमसा, उभयम्, जवीयः, मृत्युम्

## योग्यताविस्तारः

समग्रेऽस्मिन् विश्वे ज्ञानस्याद्यं स्रोतो वेदराशिरिति सुधियः आमनन्ति। तादृशस्य वेदस्य सारः उपनिषत्सु समाहितो वर्तते। उपनिषदां 'ब्रह्मविद्या' 'ज्ञानकाण्डम्' 'वेदान्तः' इत्यपि नामान्तराणि विद्यन्ते। उप-नि इत्युपसर्गसहितात् सद् (षद्लृ) धातोः क्विप् प्रत्यये कृते उपनिषत्-शब्दो निष्पद्यते, येन अज्ञानस्य नाशो भवति, आत्मनो ज्ञानं साध्यते, संसारचक्रस्य दुःखं शिथिलीभवति तादृशो ज्ञानराशिः उपनिषत्पदेन अभिधीयते। गुरोः समीपे उपविश्य अध्यात्मविद्याग्रहणं भवतीत्यपि कारणात् उपनिषदिति पदं सार्थकं भवति।

प्रसिद्धासु 108 उपनिषत्स्वपि 11 उपनिषदः अत्यन्तं महत्त्वपूर्णाः महनीयाश्च। ताः ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-ऐतरेय-तैत्तिरीय-छान्दोग्य-बृहदारण्यक-श्वेताश्वतराख्याः वेदान्ताचार्याणां टीकाभिः परिमण्डिताः सन्ति।

आद्यायाम् ईशावास्योपनिषदि 'ईशाधीनं जगत्सर्वम्' इति प्रतिपाद्य भगवदर्पणबुद्ध्या भोगो निर्दिश्यते। ईशोपनिषदि 'जगत्यां जगत्' इति कथनेन समस्तब्रह्माण्डस्य या गत्यात्मकता निरूपिता सा आधुनिकगवेषणाभिरपि सत्यापिता। सततं परिवर्तमाना ब्रह्माण्डगता *चलनस्वभावा* या सृष्टिः-पशूनां प्राणिनां, तेजःपुञ्जानां, नदीनां, तरङ्गाणां, वायोः वा; या च स्थिरत्वेन अवलोक्यमाना सृष्टिः-पर्वतानां,

www.dreamtopper.in

वृक्षाणां, भवनादीनां वा सा सर्वा अपि सृष्टिः ईश्वराधीना सती चलत्स्वभावा एव। ईश्वरस्य विभूत्या सर्वा अपि सृष्टिः परिपूर्णा चलत्स्वभावा च चकास्ते। तदुक्तं भगवद्गीतायाम्–

**यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।**
**तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥ इति ॥**

*भगवद्गीता–10.41*

उपनिषत्प्रस्थानरहस्यं विद्याया अविद्यायाश्च समन्वयमुखेन अत्र उद्घाटितमस्ति। ये जना अविद्यापदवाच्येषु यज्ञयागादिकर्मसु, भौतिक–शास्त्रेषु, लौकिकेषु ज्ञानेषु दैनन्दिनसुखसाधनसञ्चयनार्थं संलग्नमानसा भवन्ति ते लौकिकीम् उन्नतिं प्राप्नुवन्त्येव; किन्तु तेषां तेषां जनानाम् आध्यात्मिकं बलम्, अन्तस्सत्त्वं वा निस्सारं भवति। ये तु विद्यापदवाच्ये आत्मज्ञाने *एव* केवलं संलग्नमनसः भवन्ति, भौतिकज्ञानस्य साधनसामग्रीणां च तिरस्कारं कुर्वन्ति ते जीवननिर्वाहे, लौकिकेऽभ्युदये च क्लेशमनुभवन्ति।

अत एव **अविद्यया** भौतिकज्ञानराशिभिः मानवकल्याणकारीणि जीवनयात्रासम्पादकानि वस्तूनि सम्प्राप्य **विद्यया** आत्मज्ञानेन–ईश्वरज्ञानेन जन्ममृत्युदुःखरहितम् अमृतत्वं प्राप्नोति। विद्याया अविद्यायाश्च ज्ञानेन एव इह लोके सुखं परत्र च अमृतत्वमिति कल्याणीं वाचम् उपदिशति उपनिषत् 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति।

**पाठ्यांशेन सह भावसाम्यं पर्यालोचयत ।**

नियतं कुरु कर्म त्वं कर्म ज्यायोऽह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।। *भगवद्गीता–3.8*

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते।। *कठोपनिषत्–3.15*

**कठोपनिषदि प्रतिपादितं श्रेयः प्रेयश्च अधिकृत्य सङ्गृह्णीत ।**

दिङ्मात्रं यथा–
श्रेयश्च प्रेयश्च मनुष्यमेतस्
तौसंपरीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते
प्रेयो मन्दो योगक्षेमात् वृणीते।।

*कठोपनिषत्–2.2*



www.dreamtopper.in

**विविधासु उपनिषत्सु प्रतिपादिताम् आत्मप्राप्तिविषयकजिज्ञासां विशदयत**

नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्यस्तस्यैष
आत्मा विवृणुते तनूं स्वाम्।।

*कठोपनिषत्–2.23*

**वैदिकस्वराः**

वैदिकमन्त्रेषु उच्चारणदृष्ट्या त्रिविधानां 'स्वराणां' प्रयोगो भवति। मन्त्राणाम् अर्थमधिकृत्य चिन्तनं प्रकृतिप्रत्यययोः योगं, समासं वाश्रित्य भवति। तत्र अर्थनिर्धारणे स्वरा महत्त्वपूर्णा भवन्ति। 'उच्चैरुदात्तः' 'नीचैरनुदात्तः' 'समाहारः स्वरितः' इति पाणिनीयानुशासनानुरूपम् उदात्तस्वरः ताल्वादिस्थानेषु उपरिभागे उच्चारणीयः, अनुदात्तस्वरः ताल्वादीनां नीचैः स्थानेषु, उभयोः स्वरयोः समाहाररूपेण (समप्रधानत्वेन) स्वरित उच्चारणीय इति उच्चारणक्रमः। वैदिकशब्दानां निर्वचनार्थं प्रवृत्ते निरुक्ताख्ये ग्रन्थे पाणिनीयशिक्षायां च स्वरस्य महत्त्वम् इत्थमुक्तम्–

मन्त्रो हीनस्स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुस्स्वरतोऽपराधात्।।

मन्त्राः स्वरसहिताः उच्चारणीया इति परम्परा। अतः स्वरितस्वरः अक्षराणाम् उपरि चिह्नेन, अनुदात्तस्वरः अक्षराणां नीचैः चिह्नेन, उदात्तस्वरः किमपि चिह्नं विना च मन्त्राणां पठन-सौकर्यार्थं प्रदर्श्यते।

www.dreamtopper.in